1. किं नाम वेदाङ्गम्? कानि तानि? निरुक्तवेदाङ्गस्य परिचयं संक्षेपेन उपस्थापयत। — 10 (2+8)

⇒ 'अङ्ग्यन्ते ज्ञायन्ते अमीभिरिति अंगानि', इति व्युत्पत्त्यनुसारेण अंगशब्दस्यार्थः उपकारको वर्तते। ~~[illegible]~~ पवित्रवेदमन्त्रः शुद्धरूपेण ज्ञानाय येषां शास्त्राणाम् आवश्यकता वर्तते, तान्येव शास्त्राणि वेदाङ्गानि रूपेण स्वीक्रियन्ते। वेदाङ्गानि कानि? अस्य उत्तरे भगवता यास्केन प्रतिपादितमस्ति यत् — शिक्षा-कल्प-व्याकरण-निरुक्त-छन्द-ज्योतिषि भवन्ति षड् वेदाङ्गानि।

"शिक्षा कल्पो व्याकरणं निरुक्तं छन्दसां चयः।
ज्योतिषामयनं चैव वेदाङ्गानि षडेव तु॥"

~~[illegible]~~

जगदुत्पत्तेः परमेव भारतीय ऋषयः पवित्रवेदमन्त्रः अपश्यन्। अतः क्रमेण वेदमन्त्रपाठसौकार्यार्थं संहितापाठ-पदपाठ-प्रातिशाख्यादि रचना प्रारब्धा। अनेन सह वेदपाठोपकारकः षड्वेदाङ्गमपि प्रचलितम् अभवत्। एतेषु वेदाङ्गेषु विशेषरूपेण निरुक्त व्याकरणयोः वेदाङ्गयोः माहात्म्यमधिकाधिकं, नास्ति सन्देहलेशः। एतयोः वेदाङ्गयोः माहात्म्यं स्वीकृत्य क्रमेण वेदपुरुषस्य श्रोत्र-मुखत्वेन अपदिश्यते पाणिनीय-शिक्षायाम्।

'निरुक्तं श्रोत्रमुच्यते', 'मुखं व्याकरणं स्मृतम्'।

व्याकरणवेदाङ्गं पवित्रवेदमन्त्रं शुद्धरूपेण उच्चारणार्थम् उपदिशति, तथा च ~~निरुक्ते~~ निरुक्तवेदाङ्गं वेदस्य

Scanned with CamScanner

अन्तर्भूतार्थम् आलोचयति, तथैव निरुक्ते व्याकरणस्य विषयाणां सन्निवेशितत्वात् निरुक्तं व्याकरणस्य सम्पूर्णतामपि साधयति। अस्मात् कारणादेव निरुक्तकारेण उक्तम् - "तदिदं विद्यास्थानं व्याकरणस्य कार्त्स्न्यम्"। अनेन क्रमेण निरुक्तं व्याकरणस्य सम्पूर्णतामपि निर्वचनं विदधाति तथा च स्वकार्यमपि साधयतीति।

अत्र च वक्तुमुचितं भवति यत् -
'निघण्टु' नाम कस्यचित् कोशग्रन्थस्य भाष्यरूपं निरुक्तम्। निघण्टौ केवलं वैदिकशब्दानां संग्रहः अस्ति। निरुक्तकारेण यास्काचार्येण एतेषां शब्दानां सविस्तारेण व्याख्या कृता। निघण्टोः पञ्चाध्यायान् [illegible] निरुक्ते द्वादशेषु अध्यायेषु विभज्यालोच्यते निरुक्तकारेण यास्काचार्येण। निघण्टौ गोशब्दारभ्य देवपत्नी शब्दः पर्यन्तम् १७७० वैदिकशब्दानां संग्रहः वर्तते। निरुक्तकारेण यास्काचार्येण ११७२ शब्दाः तस्य निरुक्तग्रन्थे उल्लिखिता।

निःशेषेण उक्तम्, निरुक्तम्। निर्- वच्- क्त प्रत्ययेन निरुक्तशब्दः सम्पन्नः। अस्य उत्तरे वेदभाष्यकारः सायणाचार्येण कथितम् -

'अर्थावबोधे निरपेक्षतया पदजातं यत्रोक्तं तन्निरुक्तम्'।
यदि अन्यानि वेदाङ्गानि वेदस्य बहिर्भूतानि तत्त्वानि व्याकुर्वन्ति, तर्हि निरुक्तम् वेदस्य

अन्तर्भूतानि तत्त्वानि आकर्षन्ति। ~~अयं च~~
अयं च निरुक्तं गद्यशैल्यां निबद्धमस्ति, किन्तु
~~अन्ये~~ अन्ये वेदाङ्गग्रन्थाः सूत्रशैल्यां निबद्धाः
सन्ति। इत्थं निरुक्तेन वेदार्थावगमे
सौविध्यं भवति।

---

2. निरुक्तनाम वेदाङ्गस्य प्रयोजनम् उद्देश्यं वा
यास्कानुरीत्या प्रतिपाद्यताम्। —— 10

⇒ षड्सु वेदाङ्गेषु निरुक्तवेदाङ्गं अन्यतमम्। यतोहि
निरुक्तं विना वेदार्थज्ञानं दुःसम्पाद्यं भवति।
अर्थात् निरुक्तेन वेदार्थावबोधे सौविध्यं भवति।
निरुक्तस्य प्रयोजनमुपस्थापयन् निरुक्तकारः
यास्काचार्यः ग्रन्थारम्भे प्रतिपादितम् यत् -
'समाम्नायः समाम्नातः स व्याख्यातव्यः।'
एतेन ज्ञायते यत् निरुक्तस्य प्रधानमुद्देश्यं
निघण्टोर्व्याख्या ~~वर्तते~~ वर्तते। यास्काचार्येन
कथितम् - ~~'अथापीदमन्तरेण मन्त्रेषु~~
'अथापीदमन्तरेण मन्त्रेष्वर्थप्रत्ययो न विद्यते।'
अनेन वाक्येन ज्ञायते यत् - निरुक्तं
वेदमन्त्राणामर्थनिर्णयं करोति, वैदिकशब्दानां
~~प्रयोगम~~ प्रयोगान् दर्शयितुं यास्काचार्यः वैदिकमन्त्रान्
उद्धृत्य तेषां व्याख्यां करोति। इत्थं मन्त्राणामर्थ-
ज्ञानं निरुक्तेन सम्पद्यते। अन्यच्च

Scanned with CamScanner

" तदिदं विद्यास्थानं व्याकरणस्य कार्त्स्न्यम्।"
अर्थात् यानि चतुर्दशसंख्यकानि विद्यास्थाना-
-नि अभिहितानि तेषु निरुक्तस्य अपि एकं स्थानं
वर्तते। व्याकरणस्य पूर्णता निरुक्तेनैव भवति,
यतः व्याकरणं तु केवलं शब्दानेव व्याकरोति।
किन्तु निरुक्तं तु अर्थस्यापि व्याख्यां करोति।
अन्यच्च प्रयोजनविशिष्टम् आह, यास्काचार्यः,
" अथापीदमन्तरेण पदविभागो न विद्यते।"
अर्थात् निरुक्तं विना पदविभागं कर्तुं नैव शक्यते।
अर्थवशेन हि पदान्यवतिष्ठन्ते न च इदम् तदेवार्थ-
-परिज्ञानमस्ति। अतः निरुक्तेनैव पदानां विभागः
कर्तुं शक्यते। देवतापरिज्ञानमपि निरुक्तस्य
प्रयोजनं वर्तते। यतः यज्ञकर्मणि देवतानां विषये
बहवः विधयो भवन्ति; तेषां ज्ञानं निरुक्तेनैव
भवितुमर्हति। निरुक्तज्ञः एव देवतानां विधानि
जानन्ति। निरुक्तस्यापरं प्रयोजनं तु "
'ज्ञानप्रशंसा अज्ञाननिन्दा च।'। यथा वेदेषु
अर्थज्ञानस्य प्रशंसा, अज्ञानस्य निन्दा च
श्रूयते। यथा -
" स्थाणुरयं भारहारः किलाभूत्-
दधीत्य वेदं न विजानाति योऽर्थम्।
योऽर्थज्ञ इत्सकलं भद्रमश्नुते,
नाकमेति ज्ञानविधूतपाप्मा।" ऋग्वेद- ८.७१.५

अर्थात् - लोकेऽस्मिन् यः कश्चित् विद्वान् न
पूज्यते । यथा - स्थाणुर्वृक्षः पत्रपुष्पफलानाम्
आत्मीयानां धारणमात्रेणैव सम्बध्यते, न
तद्गतैर्गन्ध - रस - रूप - स्पर्शौ स्पर्शोपभोगसुखैः ।
गीतायामपि उच्यते -

'नहि ज्ञानेन सदृशं पवित्रमिह विद्यते ।'

यथा शुष्ककाष्ठमनग्नौ अग्निरहिते प्रदेशे न ज्वलति,
तथैव यो वेदाध्ययनमात्रं करोति, स न तदीयं
फलं लभते । तस्मात् एतत् परिज्ञानाम
निरुक्तस्याध्ययनमवश्यकरणीयमित्यर्थः ।
इत्थं ज्ञानप्रशंसा अज्ञाननिन्दा च न
केवलं स्मृतौ एव अपितु वेदेऽपि वर्णितमस्ति ।
यथा -

" उत त्वः पश्यन्न ददर्श वाच -
मुत त्वः शृण्वन्न शृणोत्येनाम् ।
उतो त्वस्मै तन्वं विसस्रे,
जायेव पत्य उशती सुवासाः ॥"

अर्थात्- यः कश्चित् एकः मूर्खः वाचं पश्यन् अपि मनस्या न पश्यति। वाचं शृण्वन् अपि मनसा न शृणोति। यः कश्चित् अर्थाभिज्ञस्तु तां वाचं सम्यक् पश्यति, यतः अर्थं विजानाति। अर्थपरिज्ञानफलं इति वागित्यभि-प्रायः। अनेन प्रकारेण यास्काचार्येण तस्य निरुक्ते, अर्थज्ञान प्रशंसा माध्यमेन निरुक्तस्य प्रयोजनमुद्देश्यं वा उपदिश्यते।

— ४ —

3. निरुक्तमनुसृत्य पदचतुष्टयम् उपस्थापयत ।

⇒ यास्काचार्यस्तु पदानां भेदचतुष्टयं स्वीकरोति । ते च नामाख्यातोपसर्गनिपाताः सन्ति । यास्काचार्येण कथितं यत् - "चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताश्च तानीमानि भवन्ति।" अर्थात्, पदानां चतस्रः जातयः भवन्ति, - नामजातिः, आख्यातजातिः, उपसर्गजातिः, निपातजातिश्च।

(i) नाम : नाम्नां लक्षणं निरूपयन् आह, आचार्यो यास्कः, 'सत्त्वप्रधानानि नामानि'। सीदति गच्छति अन्वेति लिंगसंख्यादिकमस्मिन्निति सत्त्वं द्रव्यम्। नमन्ति आख्यातशब्दे गुणभावेन, नमन्ति वा स्वमर्थमाख्यातशब्दवाच्ये गुणभावेनेति नामानि। नाम्नः चत्वारोऽर्थाः भवन्ति, - सत्त्व-द्रव्य-संख्या-लिंगानि। तेषु सत्त्वस्य एव प्रधानता भवति। अत एव उक्तम् - "सत्त्वप्रधानानि नामानि" इति। सत्त्वसामान्यस्य स्वरूपम् उदाहरणेन एव उपदिशन्ति - 'अदः' इति सत्त्वानामुपदेशः। सत्त्वस्य विशेषस्वरूपञ्च 'गौरश्वः पुरुषो हस्तीति'।

(ii) आख्यातम् : आख्यातस्य लक्षणं यास्केन उक्तम् - 'भावप्रधानमाख्यातम्'।

अर्थात् भवतीति भावः। भाव एव भावना, सा च असत्त्वभूतो धात्वर्थोऽत्र गृह्यते। इयमेव भावना 'क्रिया' इत्युच्यते। यथोक्तम् -

"यत्र सिद्धमसिद्धं च साध्यत्वेनाभिधीयते ।
आश्रितक्रमरूपत्वात् सा च क्रियेत्यभिधीयते ॥"

सोऽयं भावः प्रधानं यत्र गुणीभूतानि च यानि कारकाणि तदिदं भावप्रधानम् आख्यातमित्यभिधीयते। "आख्यायन्ते क्रियागुणभावेन वर्तमानानि स्त्रीपुंनपुंसकानि अनेनेत्याख्यातम्," तदिदं आख्यातम् चतुष्प्रकारकं भवति । कर्तरि, भावे, कर्मणि, कर्मकर्तरि च। तत्र 'पचति देवदत्तः' इति कर्तरि। 'भूयते देवदत्तेन' इति भावे। 'पच्यते ओदनो देवदत्तेन' इति कर्मणि। 'पच्यते ओदनः स्वयमेव' इति कर्मकर्तरि।

अत्र ज्ञातव्यमस्ति यत् - भाव-काल-कारकः-संख्याश्च चत्वारोऽर्थाः भवन्ति आख्यातस्य, तेषु भावस्य प्रधानता भवति, अतोऽपि उक्तम् 'भावप्रधानमाख्यातम्'।

उपसर्गः- उपसर्गविषये निरुक्तकारेण आचार्ययास्केन स्वमतं न प्रदत्तम्। शाकटायनः नाम कश्चित् पूर्वाचार्यस्य मतं उल्लिख्य तेन भणितम् यत् - "न निर्बद्धा उपसर्गा अर्थान्निराहुरिति शाकटायनः।" आख्यातस्यार्थविशेषं सृजन्तीत्युपसर्गाः प्रादयः। नामाख्यातयोरेव योऽर्थः कर्मक्रियारूपः, तत्रैव विशेषं

तैरोपसंयोगेन व्यंजयन्ति न तु स्वातन्त्र्येण कमप्यर्थं वाऽभिव्यक्तिं दधाति । तस्मात् पृथक् अवस्थिताः उपसर्गाः अनर्थकाः भवन्ति । परन्तु गार्ग्यमतानुसारेण नामाख्यातेभ्यो विमुक्तानामपि उपसर्गाणाम् अनेके अर्थाः भवन्त्येव । तेन कथितम् -

'उच्चावचाः भवन्तीति गार्ग्यः' ।

यथा आ इत्यर्वागर्थे । प्रपरेत्येतस्य प्रातिलोम्यम् । अभीत्याभिमुख्यम् । इत्यादयः । निरुक्तानुसारेण विंशति उपसर्गाः सन्ति । ते च - प्र, परा- अप- सम- नि- अनु- निर्- दुर्, वि, आङ्, अधि- अपि- अति- सु- उत्- अभि- प्रति- परि- उप - वि ।

<u>निपाताः</u> नि- √पत् + ण प्रत्ययेन निपातशब्दः व्युत्पन्नः । पुंलिङ्गे 'नितरां पतनमिति' इत्यर्थे नि- पत् + घञ् प्रत्ययेनापि निपातशब्दः भवितुं शक्यते । निपातविषये यास्केन कथितं मतं - "उच्चावचेष्वर्थेषु निपतन्तीति निपाताः" । इमे निपाताः उपमार्थे, कर्मोपसंग्रहार्थे पादपूरणे च प्रयुक्ता भवन्ति । निपातस्य अवस्थावैचित्र्यविषये यास्केन कथितम् -

'अप्युपमार्थेऽपि कर्मोपसंग्रहार्थेऽपि -

पादपूरणः। अर्थात् इमे निपाताः उपमार्थे, कर्मोपसंग्रहार्थे, पादपूरणे च प्रयुक्ताः भवन्ति। अस्मिन् विषये निरुक्तव्याख्याकारेण लक्ष्मणस्वरूप-महाभागेनोक्तम् – "The particles occur in various senses, both in a comparative sense, in a conjunctive sense, and as expletives."

एतेषु निपातेषु 'इव, न, चित्, नु, इति चत्वारो निपाताः प्रायेणोपमार्थे प्रयुक्ताः भवन्ति। अत्र वक्तुमुचितं भवति यत्- न इति निपातः, लौकिकभाषायां निषेधार्थकः भवति, किन्तु वैदिकभाषायां निषेधार्थकः उपमार्थकश्च उभयविधः भवति। इव तु सर्वत्र उपमार्थकः एव भवति। कर्मोपसंग्रहार्थेषु वा, अ, अह, ह, किल, ननु, खलु, आहोस्वित् इत्यादयः निपाताः भवन्ति। एवमेव पादपूरणार्थ-केषु निपातेषु कम्- ईम्- इत्- उ- इत्यादिकाः अन्यतमाः। एते हि निपाताः प्रायेण पादपूरणा एव भवन्ति।